# shivakailAsAShTottarashatanAmAvaliH

# શ્રીશિવકૈલાસાષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : Mahakailasa or Kameshvara Ashtottarashata Namavali 108 Names

File name : mahAkailAsa108.itx

Category : aShTottarashatanAmAvalI, shiva, nAmAvalI

Location : doc_shiva

Transliterated by : N.Balasubramanian bbalu at satyam.net.in

Proofread by : N.Balasubramanian bbalu at satyam.net.in

Latest update : July 9, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 19, 2023

*sanskritdocuments.org*

# શ્રીશિવકૈલાસાષ્ટોત્તરશતનામાવલિઃ

ૐ શ્રીમહાકૈલાસશિખરનિલયાય નમો નમઃ ।
ૐ હિમાચલેન્દ્રતનયાવલ્લભાય નમો નમઃ ।
ૐ વામભાગકલત્રાર્ધશરીરાય નમો નમઃ ।
ૐ વિલસદ્દિવ્યકર્પૂરદિવ્યાભાય નમો નમઃ ।
ૐ કોટિકન્દર્પસદૃશલાવણ્યાય નમો નમઃ । ૫।
ૐ રત્નમૌક્તિકવૈડૂર્યકિરીટાય નમો નમઃ ।
ૐ મંદાકિનીજલોપેતમૂર્ધજાય નમો નમઃ ।
ૐ ચારુશીતાંશુશકલશેખરાય નમો નમઃ ।
ૐ ત્રિપુણ્ડ્રભસ્મવિલસત્ભાલકાય  નમો નમઃ ।
ૐ સોમપાવકમાર્તાણ્ડલોચનાય નમો નમઃ । ૧૦
ૐ વાસુકીતક્ષકલસત્કુણ્ડલાય નમો નમઃ ।
ૐ ચારુપ્રસન્નસુસ્મેરવદનાય નમો નમઃ ।
ૐ સમુદ્રોદ્ભૂતગરલકંધરાય નમો નમઃ ।
ૐ કુરંગવિલસત્પાણિકમલાય નમો નમઃ ।
ૐ પરશ્વધદ્વયલસદ્દિવ્યકરાબ્જાય નમો નમઃ । ૧૫।
ૐ વરાભયપ્રદકરયુગલાય નમો નમઃ ।
ૐ અનેકરત્નમાણિક્યસુહારાય નમો નમઃ ।
ૐ મૌક્તિકસ્વર્ણરુદ્રાક્ષમાલિકાય નમો નમઃ ।
ૐ હિરણ્યકિંકિણીયુક્તકંકણાય નમો નમઃ ।
ૐ મંદારમલ્લિકાદામભૂષિતાય નમો નમઃ । ૨૦
ૐ મહામાતંગસત્કૃત્તિવસનાય નમો નમઃ ।
ૐ નાગેંદ્રયજ્ઞોપવીતશોભિતાય નમો નમઃ ।
ૐ સૌદામિનીસમચ્છાયસુવસ્ત્રાય નમો નમઃ ।
ૐ સિંજાનમણિમંજીરચરણાય નમો નમઃ ।
ૐ ચક્રાબ્જધ્વજયુક્તાંઘ્રિસરોજાય નમો નમઃ । ૨૫।

ૐ અપર્ણાકુચકસ્તૂરીશોભિતાય નમો નમઃ ।
ૐ ગુહમત્તેભવદનજનકાય નમો નમઃ ।
ૐ બિડૌજોવિધિવૈકુણ્ઠસન્નુતાય નમો નમઃ ।
ૐ કમલાભારતીંદ્રાણીસેવિતાય નમો નમઃ ।
ૐ મહાપંચાક્ષરીમન્ત્રસ્વરૂપાય નમો નમઃ । ૩૦
ૐ સહસ્રકોટિતપનસંકાશાય નમો નમઃ ।
ૐ અનેકકોટિશીતંશુપ્રકાશાય નમો નમઃ ।
ૐ કૈલાસતુલ્યવૃષભવાહનાય નમો નમઃ ।
ૐ નંદીભૃંગીમુખાનેકસંસ્તુતાય નમો નમઃ ।
ૐ નિજપાદાંબુજાસક્તસુલભાય નમો નમઃ । ૩૫।
ૐ પ્રારબ્ધજન્મમરણમોચનાય નમો નમઃ ।
ૐ સંસારમયદુઃખૌઘભેષજાય નમો નમઃ ।
ૐ ચરાચરસ્થૂલસૂક્ષ્મકલ્પકાય નમો નમઃ ।
ૐ બ્રહ્માદિકીટપર્યન્તવ્યાપકાય  નમો નમઃ ।
ૐ સર્વસહામહાચક્રસ્યન્દનાય નમો નમઃ । ૪૦
ૐ સુધાકરજગચ્છક્ષૂરથાંગાય નમો નમઃ ।
ૐ અથર્વઋગ્યજુસ્સામતુરગાય નમો નમઃ ।
ૐ સરસીરુહસંજાતપ્રાપ્તસારથયે નમો નમઃ ।
ૐ વૈકુણ્ઠસાયવિલસત્સાયકાય નમો નમઃ ।
ૐ ચામીકરમહાશૈલકાર્મુકાય નમો નમઃ । ૪૫।
ૐ ભુજંગરાજવિલસત્સિઞ્જિનીકૃતયે નમો નમઃ ।
ૐ નિજાક્ષિજાગ્નિસન્દગ્ધ ત્રિપુરાય નમો નમઃ ।
ૐ જલંધરાસુરશિરચ્છેદનાય નમો નમઃ ।
ૐ મુરારિનેત્રપૂજાંઘ્રિપંકજાય નમો નમઃ ।
ૐ સહસ્રભાનુસંકાશચક્રદાય નમો નમઃ । ૫૦
ૐ કૃતાન્તકમહાદર્પનાશનાય નમો નમઃ ।
ૐ માર્કણ્ડેયમનોભીષ્ટદાયકાય નમો નમઃ ।
ૐ સમસ્તલોકગીર્વાણશરણ્યાય નમો નમઃ ।
ૐ અતિજ્વલજ્વાલામાલવિષઘ્નાય નમો નમઃ ।
ૐ શિક્ષિતાંધકદૈતેયવિક્રમાય નમો નમઃ । ૫૫।
ૐ સ્વદ્રોહિદક્ષસવનવિઘાતાય નમો નમઃ ।
ૐ શંબરાંતકલાવણ્યદેહસંહારિણે નમો નમઃ ।

ૐ રતિપ્રાર્તિતમાંગલ્યફલદાય નમો નમઃ ।

ૐ સનકાદિસમાયુક્તદક્ષિણામૂર્તયે નમો નમઃ ।

ૐ ઘોરાપસ્મારદનુજમર્દનાય નમો નમઃ । ૬૦

ૐ અનન્તવેદવેદાન્તવેદ્યાય નમો નમઃ ।

ૐ નાસાગ્રન્યસ્તનિટિલનયનાય નમો નમઃ ।

ૐ ઉપમન્યુમહામોહભંજનાય નમો નમઃ ।

ૐ કેશવબ્રહ્મસંગ્રામનિવારાય નમો નમઃ ।

ૐ દ્રુહિણાંભોજનયનદુર્લભાય નમો નમઃ । ૬૫।

ૐ ધર્માર્થકામકૈવલ્યસૂચકાય નમો નમઃ ।

ૐ ઉત્પત્તિસ્થિતિસંહારકારણાય નમો નમઃ ।

ૐ અનન્તકોટિબ્રહ્માણ્ડનાયકાય નમો નમઃ ।

ૐ કોલાહલમહોદારશમનાય નમો નમઃ ।

ૐ નારસિંહમહાકોપશરભાય નમો નમઃ । ૭૦

ૐ પ્રપંચનાશકલ્પાન્તભૈરવાય નમો નમઃ ।

ૐ હિરણ્યગર્ભોત્તમાંગચ્છેદનાય નમો નમઃ ।

ૐ પતંજલિવ્યાઘ્રપાદસન્નુતાય નમો નમઃ ।

ૐ મહાતાણ્ડવચાતુર્યપંડિતાય નમો નમઃ ।

ૐ વિમલપ્રણવાકારમધ્યગાય નમો નમઃ । ૭૫।

ૐ મહાપાતકતૂલૌઘપાવનાય નમો નમઃ ।

ૐ ચંડીશદોષવિચ્છેદપ્રવીણાય નમો નમઃ ।

ૐ રજસ્તમસ્સત્ત્વગુણગણેશાય નમો નમઃ ।

ૐ દારુકાવનમાનસ્ત્રીમોહનાય નમો નમઃ ।

ૐ શાશ્વતૈશ્વર્યસહિતવિભવાય નમો નમઃ । ૮૦

ૐ અપ્રાકૃતમહાદિવ્યવપુસ્થાય નમો નમઃ ।

ૐ અખંડસચ્ચિદાનન્દવિગ્રહાય નમો નમઃ ।

ૐ અશેષદેવતારાધ્યપાદુકાય નમો નમઃ ।

ૐ બ્રહ્માદિસકલદેવવન્દિતાય નમો નમઃ ।

ૐ પૃથિવ્યપ્તેજોવાય્વાકાશતુરીયાય નમો નમઃ । ૮૫।

ૐ વસુન્ધરમહાભારસૂદનાય નમો નમઃ ।

ૐ દેવકીસુતકૌન્તેયવરદાય નમો નમઃ ।

ૐ અજ્ઞાનતિમિરધ્વાન્તભાસ્કરાય નમો નમઃ ।

ૐ અદ્વૈતાનન્દવિજ્ઞાનસુખદાય નમો નમઃ ।

ૐ અવિદ્યોપાધિરહિતનિર્ગુણાય નમો નમઃ । ૯૦
ૐ સપ્તકોટિમહામન્ત્રપૂરિતાય નમો નમઃ ।
ૐ ગંધશબ્દસ્પર્શરૂપસાધકાય નમો નમઃ ।
ૐ અક્ષરાક્ષરકૂટસ્થપરમાય નમો નમઃ ।
ૐ ષોડશાબ્દવયોપેતદિવ્યાંગાય નમો નમઃ ।
ૐ સહસ્રારમહાપદ્મમણ્ડિતાય નમો નમઃ । ૯૫।
ૐ અનન્તાનન્દબોધાંબુનિધિસ્થાય નમો નમઃ ।
ૐ અકારાદિક્ષકારાન્તવર્ણસ્થાય નમો નમઃ ।
ૐ નિસ્તુલૌદાર્યસૌભાગ્યપ્રમત્તાય નમો નમઃ ।
ૐ કૈવલ્યપરમાનન્દનિયોગાય નમો નમઃ ।
ૐ હિરણ્યજ્યોતિવિભ્રાજત્સુપ્રભાય નમો નમઃ । ૧૦૦
ૐ જ્યોતિષાંમૂર્તિમજ્યોતિરૂપદાય નમો નમઃ ।
ૐ અનૌપમ્યમહાસૌખ્યપદસ્થાય નમો નમઃ ।
ૐ અચિંત્યમહિમાશક્તિરંજિતાય નમો નમઃ ।
ૐ અનિત્યદેહવિભ્રાંતિવર્જિતાય નમો નમઃ ।
ૐ સકૃત્પ્રપન્નદૌર્ભાગ્યચ્છેદનાય નમો નમઃ ।
ૐ ષટ્ત્રિંશત્તત્ત્વપ્રશાદભુવનાય નમો નમઃ ।
ૐ આદિમધ્યાન્તરહિતદેહસ્થાય નમો નમઃ ।
ૐ પરાનન્દસ્વરૂપાર્થપ્રબોધાય નમો નમઃ ।
ૐ જ્ઞાનશક્તિકૃયાશક્તિસહિતાય નમો નમઃ ।
ૐ પરાશક્તિસમાયુક્તપરેશાય નમો નમઃ । ૧૧૦
ૐ ઓંકારાનન્દનોદ્યાનકલ્પકાય નમો નમઃ ।
ૐ બ્રહ્માદિસકલદેવવન્દિતાય નમો નમઃ । ૧૧૨

॥ શ્રી મહાકૈલાસાષ્ટોત્તરશતનામાવલિઃ સંપૂર્ણા ॥

કામેશ્વરાષ્ટોત્તરશતનામાવલિઃ ચ
અથવા શિવરહસ્યોક્ત શિવાષ્ટોત્તરશતનામાવલી ।

Endoded by N. Balasubramanian bbalu@satyam.net.in

*shivakailAsASHTottarashatanAmAvaliH*

pdf was typeset on December 19, 2023

Please send corrections to *sanskrit@cheerful.com*